श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री विष्णोः षोडशनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री विष्णोः षोडशनामस्तोत्रम् ॥

औषधे चिन्तयेद् विष्णुं भोजने च जनार्दनम्।
शयने पद्मनाभं च विवाहे च प्रजापतिम्॥ १ ॥

युद्धे चक्रधरं देवं प्रवासे च त्रिविक्रमम्।
नारायणं तनुत्यागे श्रीधरं प्रियसङ्गमे॥ २ ॥

दुस्स्वप्ने स्मर गोविदं सङ्कटे मधुसूदनम्।
कानने नारसिंहं च पावके जलशायिनम्॥ ३ ॥

जलमध्ये वराहं च पर्वते रघुनन्दनम्।
गमने वामनं चैव सर्वकालेषु माधवम्॥ ४ ॥

षोडशैतानि नामानि प्रातरुथाय यः पठेत्।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ ५ ॥

॥ इति श्री विष्णोः षोडशनामस्तोत्रम् संपूर्णम् ॥